# श्रीदत्तात्रेयस्तुतिः

Shri Dattatreya Stuti

sanskritdocuments.org

June 8, 2019

Shri Dattatreya Stuti

# श्रीदत्तात्रेयस्तुतिः

## Sanskrit Document Information

Text title : Dattatreya Stuti

File name : dattAtreyastutiH.itx

Category : deities_misc, shrIdharasvAmI, dattatreya

Location : doc_deities_misc

Author : shrIdharasvAmI

Transliterated by : Sunder Hattangadi sunderh at hotmail.com

Proofread by : Sunder Hattangadi sunderh at hotmail.com

Latest update : June 8, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

June 8, 2019

*sanskritdocuments.org*

# श्रीदत्तात्रेयस्तुतिः

जगत्सत्यं वा नो न च तनुरहं वा तनुरहं
अहं भूमा नो वा मनुत इति यो नोऽद्वयरसः ।
न माया नोऽविद्या स्पृशति किल यं तं सुविमलं
गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ १॥

त्रिमूर्तीनां मायारहितमतिशुद्धं निजपदं
परं सच्चित्सौख्यं प्रकटितमहोऽत्र त्रिवदनैः ।
निजब्रह्मैक्यं यद्विहरति वितन्वन् य इह तं
गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ २॥

तपस्तेपेऽत्रिर्यत्तनुजजनने भक्तिवशतः
तया प्रीत्या दत्तः स्फुटतरपरात्मैव कृपया ।
ददात्यात्मानं यो ह्यतिकरुणया तं सुखनिधिं
गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ३॥

विभुर्यो नित्यो वाऽक्षरमिति च वा ब्रह्म परमं
वरेण्यं सत्यं वा तनुविभवः पाशरहितः ।
स्वभक्तानां मुक्त्यै सगुण इति यस्तं श्रुतिनुतं
गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ४॥

न भोगैर्नो दानं च खलु तथा यागनिचयै-
र्न शास्त्रैर्नो योगैर्बहुविधानैर्न वशगः ।
कलौ भक्त्या प्रीतो भवति च वशो यस्तमभयं
गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ५॥

न माया नोऽविद्या जगदिदमहो जैवमथवा
न पिण्डं ब्रह्माण्डं भवति न जनुर्यस्य दयया ।
दयासिन्धुर्यस्तं भवदलनदक्षं मुनिनुतं
गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ६॥।

भवेद्यः सन्तुष्टः स्मरणमपि चेद्वा यदि कृतं
    निजं ज्ञानं दत्वा विषयविषपाशान् दलति यः ।
जगत्सेतुर्यो वै भवजलनिधिं तर्तुमिह तं
    गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ७॥

न माया नोऽविद्या न च मम तु जीवेशकलना
    न विश्वं नो पिण्डं न च मम जनिर्वा मृतिरपि ।
नरो नो नारी वा न च मम विकारः क्वचिदिति
    गुरुं दत्तात्रेयं भज नतमनोऽभीष्टवरदम् ॥ ८॥

इति समर्थानुगृहीत महात्मा श्री श्रीधरस्वामीविरचिता
श्रीदत्तात्रेयस्तुतिः समाप्ता ।

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

*Shri Dattatreya Stuti*

pdf was typeset on June 8, 2019

Please send corrections to *sanskrit@cheerful.com*